चतुर्थः भागः

# ६. किं न्याय्यम् ?

**चित्रं पश्यन्तु, विविचिन्त्य वदन्तु**



**प्रश्नाः**

१. चित्रे के के सन्ति ? ते किं कुर्वन्ति ?

२. चित्रे विद्यमाना महिला किं कथयति ?

३. आभरणानि कः अपहृतवान् ?

**उद्देश्यम्** - मानवजीवनमूल्यानां ज्ञापनम् । विविधसन्दर्भेषु नूतनानुभूतीनां परिचयः । नैतिकमूल्यानां शिक्षणम् ।

**छात्रेभ्यः सूचनाः -**

१. पाठं पठन्तु । अनवगतानां पदानां वाक्यानां च अधः रेखाङ्कनं कुर्वन्तु ।

२. अनवगतानि पदानि अधिकृत्य मित्रैः सह चर्चां कुर्वन्तु ।

३. अनवगतपदानाम् अर्थान् पदकोशस्य साहाय्येन अवगच्छन्तु ।



पुरा जयन्तीपुरस्य राज्ञः सोमसिंहस्य समीपे एकः विशिष्टः कपोतः आसीत् । तस्य नाम शान्तः । सः राज्ञः अतीव प्रियतमः चतुरः सम्भाषणशीलश्च ।

शान्तः अन्तःपुरे स्वेच्छया विहरति स्म । एकदा प्रातः अन्तःपुरात् बहिरागतस्य तस्य कर्णे पतितं यत् अरण्ये एकः अमृतवृक्षः अस्तीति । तत् फलं खादन्ति चेत् नित्ययौवनाः अजरामराश्च भवन्तीति । तच्छ्रुत्वा सः कपोतः यथा कथञ्चित् तत्र गत्वा तत् फलमानीय राज्ञे दास्यामीति निश्चयमकरोत् । परस्मिन् दिने सः कपोतः अत्यन्तसाहसेन अटवीं गत्वा तं पादपं दृष्ट्वा फलं छित्त्वा पुनः आगच्छन् आसीत् । तस्मिन् समये मार्गमध्ये सूर्यः अस्तं गतः । सर्वत्र अन्धकारः व्याप्तः ।

© SCERT not to be republished



रात्रौ प्रतिगमनं कष्टमिति मत्वा कपोतः एकस्मिन् वृक्षे विश्रान्तिं स्वीकर्तुं निश्चित्य तस्य तरोः कोटरे अमृतफलं स्थापितवान् । तस्मिन् कोटरे एकः सर्पः निवसति स्म ।

आहारार्थं गतः स भुजङ्गः पुनरागत्य तत् फलं दृष्टवान् । खादितुमारभ्य अरुचिः इति मत्वा परित्यक्तवान् । एवं तत् फलं विषपूरितम् अभवत् । एतत् अजानन् कपोतः प्रातः तत् फलं स्वीकृत्य राजमन्दिरम् आगतवान् । फलं राज्ञे दत्त्वा तस्य विशेषताम् उक्तवान् च ।



फलं खादितुम् उद्युक्तः राजा प्रधानमन्त्रिणा निवारितः । प्रथमतः तस्य फलस्य भागः यस्मै कस्मैचित् निवेद्य ततः भवान् स्वीकरोतु इति मन्त्रिणा उक्तम् ।

तदा राजा कश्चित् फलभागं काकाय दत्तवान् । काकः तत् शकलं खादित्वा सपदि मृतः । मन्त्री उक्तवान् हे राजन् ! भवान् दुर्दैवात् मुक्तः । एतत् दत्त्वा भवन्तं हन्तुमुद्युक्तः कपोतः इति । राजा क्रोधेन ''एनं कपोतं कानने त्यजन्तु । विषफलं च अरण्ये भूमौ स्थापयन्तु'' इति भटान् आदिष्टवान् । तत् श्रुत्वा कपोतः अतीव दुःखितः । ते कपोतम् अटव्यां व्यसर्जयन् । भटाः फलं भूमौ स्थापितवन्तः ।

आश्चर्यकरोऽयं विषयः यत् सद्यः तत्रैकः महान् वृक्षः जातः । सः वृक्षः अद्भुतफलैः विराजमानश्च आसीत् । भटाः एतत् विचित्रं विषयं राजानमुक्तवन्तः । तत् श्रुत्वा राजा एवमादिष्टवान् - ''यः कोऽपि तत्र न गच्छेत् । तत् फलं च न खादेत् । यतः सः विषवृक्षः'' इति ।

अनन्तरं तस्य वृक्षस्य समीपे वृद्धदम्पती अवसताम् । तौ दीनौ असहायौ च, भिक्षाटनं कर्तुमपि असमर्थौ । स्वजीवनसमाप्त्यर्थं तत् फलं खादितुं निश्चितवन्तौ ।

© SCERT not to be republished



रात्रौ स वृद्धः वृक्षस्य समीपं गत्वा फलद्वयं छित्त्वा गृहमानीतवान् । जायापती फले खादितवन्तौ, प्रभाते उत्थितवन्तौ स्वस्थौ तरुणौ आत्मानौ



दृष्ट्वा विस्मितौ अभवताम् । एनं विषयं महाराजः ज्ञातवान् । राजा तत्र गत्वा तौ वृध्दौ दृष्ट्वा विस्मितः अभवत् ।



राजा सोमसिंहः कपोतेन आनीतं फलम् अमृतफलमेव इति ज्ञात्वा निष्कारणेन तं दण्डितवान् इति नितरां दुःखितः अभवत् । पूर्वापरम् अनालोच्य यत्किमपि क्रियते तत् अनर्थदायकं भवति । इतः परं सम्यक् विचिन्त्यैव दण्डनं करोमीति स निश्चितवान् ।

## एतानि कुर्वन्तु

### I. शृण्वन्तु, विचिन्त्य वदन्तु



१. पाठ्यांशचित्राणि पश्यन्तु, चित्रे के के सन्ति ? ते किं कुर्वन्ति ?
२. राजा यदा दण्डनं कृतवान् तदा निर्दोषी शान्तः किमर्थं मौनेन स्थितवान् ?
३. राज्ञः कपोते प्रीतिः खलु ! भवतः प्रीतिपात्रं पक्षी कः ? किमर्थम् ?
४. भवद्भिः दृष्टस्य विवादस्य परिष्कारं वदन्तु ।

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



१. पाठस्थानि विशिष्टानि पदानि अन्विष्य लिखन्तु ।

उदा - अमृतफलम्, सम्भाषणशीलः

२. अधः दत्तानि वाक्यानि पठन्तु । पाठस्य आधारेण दोषान् निवार्य शुध्दवाक्यानि कुर्वन्तु ।

अ. न्यायान्यायविचारणम् अकृत्वा दण्डनं दातव्यम् ।

..........................................

आ. रात्रौ कपोतः अमृतफलं सुरक्षितं भवतीति मत्वा स्वसविधे स्थापितवान् ।

..........................................

इ. फलभक्षणेन हानिः नास्ति इति मन्त्रिणा उक्तम् ।

..........................................

ई. नित्ययौवनौ भवितुं वृद्धदम्पतिभ्याम् अमृतफलमं खादितम् ।

..........................................

उ. राजा शान्तः कपोतः निष्कारणं दण्डितः इति ज्ञात्वा नितरां दुःखितः अभवत् ।

..........................................

३. अधः दत्तम् परिच्छेदं पठन्तु, तथा दत्तानां विकल्पप्रश्नानां समाधानानि लिखन्तु ।

बहोः कालात् पूर्वं विष्णुपुरम् इत्याख्यं राज्यं प्रतापसेनः पालयति स्म । प्रतापसेनस्य त्रयः पुत्राः । तेषां नामानि जयधीरः, काशीनाथः, धीमान् च ।

© SCERT not to be republished

पिता एतान् त्रीन् पुत्रान् पिता गुरुकुलं प्रेषितवान् । विद्याभ्यासं कृतवतः स्वपुत्रान् राजा एकस्मिन् विरामदिने राजकार्यपरिशीलनार्थम् आस्थानं प्रति अनयत् । तस्मिन् समये राज्ञः पुरतः कश्चन विवादः जातः । सः विवादः परिष्करणीयः इति त्रीन् पुत्रान् आज्ञापयत् ।

अ. पुरा राजपुत्राः अत्र पठन्ति स्म । ( )

अ. पाठशालायाम् आ. गुरुकुले इ. गृहे

आ. विष्णुपुरं कः परिपालयति स्म ? ( )

अ. जयधीरः आ. धीमान् इ. प्रतापसेनः

इ. राजा स्वपुत्रान् राजकार्यपरिशीलनार्थं कुत्र अनयत् ? ( )

अ. आस्थानं आ. अन्तःपुरं इ. मन्दिरम्

ई. विवादः परिष्करणीयः इति राजा कान् आज्ञापयत् ? ( )

अ. भटान् आ. मन्त्रीन् इ. पुत्रान्

© SCERT not to be republished

**४. पाठ्यांशस्य आधारेण अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु।**

अ. शान्तः कुत्र गतवान् ? किं कृतवान् ?

आ. राजा शान्तं दण्डितवान् ? किं तत् युक्तं ? किमर्थम् ?

इ. अमृतफलं विषफलत्वेन कथं परिणतम् ?

ई. मन्त्री शान्तम् उद्दिश्य राजानं किमुक्तवान् ?

उ. वृद्धदम्पती किमर्थं मर्तुं चिन्तितवन्तौ ?

## III. स्वीयरचना



**१. राजा शान्तं किमर्थं दण्डितवान् ?**

**२. सर्पेण अमृतफलभक्षणं न क्रियते चेत् किं भवति स्म ?**

**३. शान्तं दण्डितवानिति राजा दुःखितः । किमर्थम् ?**

**४. वृद्धदम्पती किमर्थं तत् फलं खादितुम् उद्युक्तौ । तयोः समस्याः काः? तासां परिष्कारः कथं करणीयः ?**

## IV. पदजालाभिवृद्धिः



१. अधः दत्तानि एकवचनपदानि बहुवचने परिवर्त्य स्वीयवाक्यानि लिखन्तु ।

अ. नदी - ........................................

आ. निर्णयः - ........................................

इ. निवासः - ........................................

ई. जन्तुः - ........................................

उ. मार्गः - ........................................

२. उदाहरणानुसारं दत्तानां पदानाम् आद्यक्षरमुपयुज्य अन्यपदानि लिखन्तु ।

| | | | | |
|---|---|---|---|---|
| उदा - | शान्तः - | शकटम् | शरत् | शारदा |
| अ. | सर्पः - | ............ | ............ | ............ |
| आ. | विषम् - | ............ | ............ | ............ |
| इ. | राजा - | ............ | ............ | ............ |
| ई. | सम्यक् - | ............ | ............ | ............ |
| उ. | मन्त्री - | ............ | ............ | ............ |
| ऊ. | कपोतः - | ............ | ............ | ............ |
| ए. | सह - | ............ | ............ | ............ |
| ऐ. | फलम् - | ............ | ............ | ............ |

३. अधः दत्तानि वाक्यानि पठित्वा तस्य भावसारम् एकेन वाक्येन लिखन्तु।

अ. कुटुम्बसमेतस्य राज्ञः निवासप्रदेशः ......................।

आ. न्याय्यं किम् अन्याय्यं किमिति वक्तुं सामर्थ्यम् ......................।

इ. अन्येषां दयाम् आश्रित्य स्थिताःजनाः ......................।

© SCERT not to be republished

४. भवतः इष्टफलानां नामानि लिखित्वा तेषां वर्णं रुचिं च लिखतु ।

| फलस्य नाम | फलस्य वर्णः | फलस्य रुचिः |
|---|---|---|
| | | |
| | | |
| | | |
| | | |
| | | |

© SCERT
Not to be republished

## V. सर्जनात्मकव्यक्तीकरणम्



१. राजमन्दिरे प्रचलितं सन्दर्भं नाटकरूपेण प्रदर्शयन्तु ।

२. फलं खादितुम् उद्युक्तं राजानं मन्त्री यदि न निवारयेत् कथा कथं भवति स्म ? तस्य सन्दर्भस्य परिवर्तनं कृत्वा लिखन्तु ।

## VI. प्रशंसा



१. पौर्वापर्यम् अविचार्य राजा कपोतं दण्डितवान् खलु ! भवतः मित्रेण कोऽपि दोषः क्रियते चेत् भवतः प्रतिस्पन्दनं कथं भवति ?

## VII. व्याकरणांशाः



१. अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितानि पदानि अवगच्छन्तु ।

अ. छात्रः श्वः पाठशालां गमिष्यति ।

आ. अद्यतनबालाः श्वस्तनपौराः भविष्यन्ति ।

इ. वृक्षकः वृक्षः भूत्वा फलानि दास्यति ।

उपरितनवाक्येषु रेखाङ्कितानि पदानि भविष्यत्क्रियां सूचयन्ति । एतादृशक्रियापदानां 'लृट्' इति व्यवहारः।

२. अधः दत्तानि पदानि उपयुज्य वाक्यनिर्माणं कुर्वन्तु ।

अ. भविष्यामः आ. करिष्यन्ति इ. द्रक्ष्यामः

ई. वदिष्यामि उ. खादिष्यामः ऊ. लेखिष्यन्ति

३. अधः दत्तानि सन्धिपदानि पठन्तु । विवरणम् अवगच्छन्तु ।

| | | | | | |
|---|---|---|---|---|---|
| तत्रैव | = तत्र | + एव | ( अ | + ए | = ऐ ) |
| तवैश्वर्यम् | = तव | + ऐश्वर्यम् | ( अ | + ऐ | = ऐ ) |
| गङ्गौघः | = गङ्गा | + ओघः | ( आ | + ओ | = औ ) |
| ममौषधम् | = मम | + औषधम् | ( अ | + औ | = औ ) |

उपरितनेषु उदाहरणेषु अ, आ इत्येताभ्यां वर्णाभ्याम् ए, ऐ इत्येतयोः परयोः **'ऐकारः'**, ओ, औ इत्येतयोः परयोः **'औकारः'** आगतः ।

**एतानि वृध्दिसन्धियुक्तानि पदानि ।**

अ, आ इत्येताभ्यां वर्णाभ्याम् ए, ऐ इत्येतयोः परयोः **ऐकारः**

ओ, औ इत्येतयोः परयोः **औकारः** च पूर्वपरयोः स्थाने एकादेशो भवति ।

अयं वृध्दिसन्धिः इति उच्यते ।

© SCERT not to be republished

## ४. अधः दत्तानां पदानां विभजनं कुर्वन्तु ।

अ. एकैकम् = ............. + ....................

आ. महैश्वर्यम् = ............. + ....................

इ. दिव्यौषधम् = ............. + ....................

ई. देशौन्नत्यम् = ............. + ....................

उ. वसुधैव = ............. + ....................

## ५. अधः दत्तानां पदानां योजनं कुर्वन्तु ।

अ. अष्ट + ऐश्वर्याणि = ....................

आ. जन + ऐक्यम् = ....................

इ. परम + ओषधिः = ....................

ई. वाक्य + ओघः = ....................

उ. महा + औदार्यम् = ....................



## परियोजनाकार्यम्

पक्षिणां चित्राणि सङ्गृह्य पटे लेपयन्तु । तेषां नामानि, विवरणं च विलिख्य प्रदर्शयन्तु ।



## स्वीयमूल्याङ्कनम्



१. पाठ्यांशचित्रस्य आधारेण कथां स्वीयवाक्यैः वक्तुं शक्नोमि । आम् / न

२. पाठं पठित्वा वाक्यानि सम्यक्तया लेखितुं शक्नोमि । आम् / न

३. राजमन्दिरे सङ्घटितं विषयं नाटकरूपेण लेखितुं शक्नोमि । आम् / न

**सत्येन रक्ष्यते धर्मः ।**

© NCERT not to be republished